International Journal of Sanskrit Research 2024; 10(1): 232-235

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(1): 232-235
© 2024 IJSR
www.anantaajournal.com
Received: 01-11-2023
Accepted: 05-12-2023

**डॉ. शकुन्तलादाशः**
अतिथि-अध्यापिका (सहायकाचार्यश्रेणी), धर्मशास्त्र विभाग, केन्द्रीय संस्कृत विश्वविद्यालयः, श्री सदाशिव परिसरः, पुरी, ओडिशा, भारत

**Corresponding Author:**
**डॉ. शकुन्तलादाशः**
अतिथि-अध्यापिका (सहायकाचार्यश्रेणी), धर्मशास्त्र विभाग, केन्द्रीय संस्कृत विश्वविद्यालयः, श्री सदाशिव परिसरः, पुरी, ओडिशा, भारत

# अध्यात्मतत्त्वसम्बलितशास्त्रं मनुस्मृतिः

## डॉ. शकुन्तलादाशः

**सारांश**
वेदोखिलो धर्ममूलमिति मनूक्तवचनं सर्वजनविदितम्। एवं स्मृतिशास्त्रस्यापि वेदतत्त्वभूयिष्ठत्वविषयं दरीदृश्यते नितराम्।स्मृतेः धर्मशास्त्राधारेण कर्मानुष्ठानोपयोगित्वम् इति या मुख्य विचारधारा वरीवर्ति तदतिरिच्य स्मृतेः ज्ञानोपयोगित्वप्रदर्शनस्याप्युपयोगिता वर्तते।वेदस्य निश्चितार्थः यः वेदान्तप्रतिपाद्य भवति स एवार्थः स्मृतावपि निर्णीयते।अतः मनुस्मृतौ प्रतिपादितमध्यात्मविज्ञानाधारेणात्र पत्रमुपस्थाप्यते। एतेन स्मृतीनां श्रुत्यनुसारित्वं वेदार्थप्रतिपादकत्वञ्चात्र स्पष्टं भविष्यति।

**कुट शब्द:** धर्मशास्त्रम्, मनुस्मृतिः, वेदान्तः, अध्यात्मम्, स्मृतिशास्त्रम्,वेदान्ततत्त्वम्

## प्रस्तावना

सुखं मे स्यात् दुःखं मा भूत् इति वैदिकां सद्भावनामुद्दिश्य सर्वाण्यपि शास्त्राणि दुःखात्यन्तनिवृत्तये परमनिरतिशयसुखप्राप्तये च प्रवृत्तातीति । तानि सर्वाण्यपि शास्त्राणि यानि निरतिशयसुखप्राप्तिसाधनानि भवन्ति दर्शनानि इत्युच्यते तत‌द्विदैः । एवं वेदादिभ्यः आरभ्यः परम्पराशास्त्रं निरतिशयसुखसाधकं दर्शनमित्यप्यपटनाम्ना सम्बभूव । यतो हि दृश्यते येन निरतिशयसुखप्राप्ति मार्गः परमतत्त्वत्वेन तद्दर्शनमित्यपि काचित् परिभाषा । तस्य च मार्गस्य प्राप्तये यानि साधनानि उक्तानि । तानि सर्वाण्यपि दर्शनमिति करणार्थे गृहीतान्यपि भवन्ति । परम्परामिमामनुसृत्य नैके महर्षयः स्वाभिरप्रायप्रकटनाय नैकानि शास्त्राणि रचयामासुः । तेषु यानि ज्ञानप्राप्तिसाधनानि निःश्रेयसमार्गदर्शकानि वभूयुः तानि दर्शनामीति अभूवन्। एवं परम्परातः प्रजापतेः सकाशात् प्राप्तं मनुना उक्तं स्मृतिशास्त्रमपि निःश्रेयसमार्गसंसाधकत्वेन दर्शनपदवाचार्हं भवति । यतो हि अस्मिन्नेव शास्त्रे उल्लिख्यते-

चतुर्वेदसमं पुण्यमस्य शास्त्रस्य धारणात् ।
भूयो वाऽप्यतिरिच्यते पापनिर्यातनं महत् ।।[1]
इत्येतन्यानवं शास्त्रं भृगुप्रोक्तंपठन्द्विजः।
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयादगतिम् ।।[2]
ये पठन्ति द्विजाः केचित्सर्वं पापोपशान्तिदम् ।
ते गच्छन्ति परं स्थानं ब्राह्मणः सद्य शाश्वतम् ।।[3]

अतः अस्य परमपुरुषार्थसाधकशास्त्रत्वेन दर्शनशास्त्रमिति संज्ञाऽपि निर्वहति इति नास्ति विचिकित्सा।किं च मनोर्माहात्यं श्रुतिष्वपि विद्यते- यद्वैकिञ्च मनुरवदतद्भेषजम् [4]इति ।
इतश्च ब्रह्मसूत्रे अविरोधाध्याये प्रथमाधिकरण(स्मृत्याधिकरण) व्याख्यानावसरे स्मृत्यनवकाशदोषप्रसङ्गान्नेतिचेन्नान्यस्मृत्यवकाशदोषप्रसङ्गः [5] इत्यस्मिन् सूत्रे सांख्यस्मृतेः निराकरणपूर्वं मनुस्मृतेः माहात्म्यं सर्वाधिकत्वं निःश्रेयससाधनपरत्वञ्चापि भववत्पादैः श्रीमदाचार्यशङ्करैः प्रतिपादितम् । अतः नाशङ्कनीयं स्मृतिशास्त्रस्य दर्शनशास्त्रत्वविषये ।

**मनुस्मृतेः सामान्यपरिचयः**

तत्र स्मृतयोऽनेकाः सन्ति । यासामपि धर्ममूलत्वं मनुना मनुस्मृतौ प्रतिपादितम् । यथा –

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । इति। [6]

स्मृतिषु मनुस्मृतेरेव श्रुत्युपग्रहेण प्राधान्यमस्ति । तथा वै श्रुतिः " यद्वै किञ्च मनुरवदत् तद्भेषजम् [7]इति। सैवेदानीं सर्वस्मृतिप्रधानभूता मनुस्मृतिः ।
मनुस्मृतेः नामान्तरमासीत् मानवधर्मशास्त्रम् ।यतो मनुनोक्तमस्ति "श्रुतिस्तु वेदविज्ञयो धर्मशास्त्रं तु वै स्मृतिः" । [8] इति । यदेव शास्त्रं प्राचीनभारतवर्षे हिन्दुसमाजस्य प्राचीनतमं संविधानमासीत्, यस्य रचनाकाल इदानीमपि अनुमीयते । किञ्च आधुनिकभारतस्य संविधाने मानवधर्मशास्त्रस्य उत मनुस्मृतेः मौलिकनीतिः यथेष्टभावेन प्रतिफलिता दृश्यते । मनुस्मृतौ द्वादशाध्यायाः सन्ति। द्वादशेष्वध्यायेषु १६८४ श्लोकाः सन्ति। प्रथमाध्यायस्थसृष्टिक्रमादारभ्य द्वादशाध्यायस्थमांजीवनदर्शनं यावद् ये विषयाः प्रतिपादिताः सन्ति, ते सर्वेऽपि विज्ञानमूलका एव। यतो मनुस्मृतिः मनुविज्ञानमित्येवोक्तमस्ति । मनुविज्ञाने कर्मण उपरि यथा प्राधान्यं दत्तमस्ति तथैव अध्यात्मविज्ञानस्योपरि अपि महत्त्वमस्तीति मनुस्मृतेरध्ययनाध्यापनद्वारा ज्ञायते ।
विज्ञानप्रभावेण तथा जीवनेप्रतिसिपर्धाबुद्धिरुपागता, यथा प्रतिस्पर्धायामेव जीवनं राष्ट्रं समाजे वा क्षयमुपैति । अस्य विकासे सदाचारस्य सहानुभूतेः शीलस्य विनयस्य च स्थानमेव नोपलभ्यते। धीरतवात् वीरत्वम्, आस्तिक्यम, तपःपुतत्वम्, स्नेह- श्रद्धा- भक्तयः, सदाचारश्च तुषारपातहतकमलानीव म्लायन्ते विनश्यन्ते च । अतो विज्ञानस्यास्य सदुपयोगो यथा भवेत्, तदर्थ सर्वैः प्रयासः करणीयः ।

**अध्यात्मविज्ञानतत्त्वसम्बलितशास्त्रं मनुस्मृतिः**

मनुविज्ञानेऽपरैर्विज्ञानैः सह मुख्यत्वेन धर्माथकाममोक्षपरकं विज्ञानमालोचितमस्ति। तत्रापि प्रसङ्गदृष्ट्या मोक्षस्यार्थदध्यात्मविज्ञानस्यापि चर्चा स्थलविशेषेषु समुपलभ्यते । येन स्वात्मोन्नतिः न केवलं भवेदपि तु जगतः कल्याणमपि भवत्येव ।
एतस्यैवाध्यात्मविज्ञानस्य महत्त्वं यद्यपि उपनिषत्सु प्राप्यते, तथापि मनुस्मृतावेव प्रसङ्गानुसारं मुख्यतः द्वादशाध्यायेऽऽलोचितम् । यस्य उदाहरणानि आलोच्यन्ते ।
अस्य लोकसिद्धस्यात्मोपकारकत्वादात्मनः शरीराख्यस्य यः कर्मसु प्रवर्तयिता तं क्षेत्रज्ञं पण्डिता वदन्ति । यः पुनरेष व्यापारान् करोति शरीराख्यः स पृथिव्यादिभूतारब्धत्वात्मैवेति पण्डितैरुच्यते। यदुक्तं मनुस्मृतौ –

योऽस्यान्तरात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते ।
यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ।।इति [9]
पुनश्च सर्वदेहिनां सहजः जीवसंज्ञकोऽन्योऽन्तरात्म अस्ति येन सर्वं सुखं दुःखं च प्रतिजन्म अनुभूयते ।

जीवसंज्ञोऽन्तरात्मान्यःसहजः सर्वदेहिनाम् ।
येन वेदयते सर्वं सुखं दुःखं च जन्मसु ।। इति। [10]

तावुभौ भूतसंपृक्तौ महान् क्षेत्रज्ञ एव च ।
उच्चावचेषु भूतेषु स्थितं तं व्याप्या तिष्ठतः ।। इति। [11]

अर्थातौ द्वौ महत्क्षेत्रज्ञौ पृथिव्यादिपञ्चभूतसंपृक्तौ वक्षमाणं सर्वलोकवेदस्मृतिपुराणदप्रसिद्या तमिति निर्दिष्टं परमात्मनः शरीरादसंख्यमूर्त्तयो जीवाः क्षेत्रज्ञशब्देनानन्तरमुक्ताः या उत्कृष्टापकृष्टभूताग्निदेवरुपतया सर्वदा कर्मसु प्रेरयन्ति । यत उक्तमस्ति-

असंख्या मूर्त्तस्तस्य निष्पतन्ति शरीरतः ।
उच्चावचानि भूतानि सततं चेष्टयन्ति याः ।। इति। [12]

स च जीवो यदि मानुषपदशायां बाहुल्येन पापमनुतिष्ठति अल्पं च पुण्यं तदा तैरेव भूतैर्मानुषदेहरुपतया परिणतैस्त्यक्तो मृतः सन्ननन्तरं पञ्चभ्य एव मात्राभ्य इत्युक्तरीत्या यातनानुभवेचितसंपातकठिनदेहो यामीः पीडा अनुभवति । स जीवो यमकारितायास्ताः पीडास्तेन कठिनदेहेनानुभूय ततो भोगेनोपहतपाप्मा तान् पञ्चजारायुजादिशरीरारम्भकान् पृथिव्यादिभूतभागान् अधितिष्ठति । यत उक्तम् –

यामीस्ता यातनाः प्राप्य स जीवो वीतकल्मषः ।
तान्येव पञ्चभूतानि पुनरभ्येति भारशः ।। इति। [13]

अर्थाद् मानुषादिशरीरं प्राप्नोतीत्यर्थऽवगम्यते । अतोऽस्य जीवस्य एता धर्माधर्महेतुकाः
स्वर्गनरकाद्युपभोगोचितप्रियाप्रियदेहप्राप्तीरन्तः करणे ज्ञात्वा धर्मानुष्ठाने सदा मनः सङ्गतं कुर्यात् ।

एता दृष्टवास्य धर्मे जावस्य गतिः स्वेनैव चेतसा ।
धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मनः ।।इति [14]

मनुना गुणानां स्वरूपविषये उक्तं –

सत्त्वं रजस्तमश्चैव त्रीन् विद्यादात्मनो गुणान् ।
यैर्व्याप्येमान् स्थितो भावान् महान् सर्वानशेषतः ॥
यो यदेषां गुणो देहे साकल्येनातिरिच्यते ।
स तदा तद्गुणप्रायं तं करोति शरीरिणम् ॥इति[15]

एदतेव श्रीमद्भगवद्गीतायामुक्तं –

सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः I
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।। इति। [16]

प्रीत्यप्रीतिविषादात्मकाः [17] भवन्ति गुणाः। सत्त्वं भवति ज्ञानाय, रजः रागद्वेषयोः कारणं तथा अज्ञाननिमित्तं तमः भवति। यथा -

सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतम् ।
एतद्व्याप्तिमदेतेषां सर्वभूताश्रितं वपुः ॥
तत्र यत्प्रीतिसंयुक्तं किं चिदात्मनि लक्षयेत् ।
प्रशान्तमिव शुद्धाभं सत्त्वं तदुपधारयेत् ॥
यत्तु दुःखसमायुक्तमप्रीतिकरमात्मनः ।
तद्रजो प्रतीपं विद्यात्सततं हारि देहिनाम् ॥
यत्तु स्यान् मोहसंयुक्तमव्यक्तं विषयात्मकम् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ इति। [18]

धर्मेण ऊर्ध्वगतिः अधर्मेण नरकादिप्राप्तिः तथा खरसूकरादि निन्दितयोनिलाभादि विषयाः अपि प्रतिपादिताः। निन्दितकर्माणः ये भवन्ति अज्ञानिनः ये भवन्ति तेषां पुनर्पुनः वश्यमापद्यते इति वारम्वारं संसारगतिर्भवति। तद्विषये उक्तम यथा –

इन्द्रियाणां प्रसङ्गेन धर्मस्यासेवनेन च ।
पापान् संयान्ति संसारानविद्वांसो नराधमाः ॥
यां यां योनिं तु जीवोऽयं येन येनैह कर्मणा ।

क्रमशो याति लोकेऽस्मिंस्तत्तत्सर्वं निबोधत ॥
बहून् वर्षगणान् घोरान्नरकान् प्राप्य तत्क्षयात् ।
संसारान् प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥ इति। [19]

एवमध्यात्मतत्त्वप्रतिपादकशास्त्रत्वेन मनुस्मृतेः महत्त्वं सर्वदा वरीवर्ति।

## पादटिप्पणी

1. मनुस्मृतिः १२०१.
2. तत्र १२१२६.
3. तत्र परि.१२१२.
4. तैत्तिरीयसंहिता २०२.१.
5. ब्रह्मसूत्रम्.२१.१.१.
6. मनुस्मृतिः.२६.
7. तैत्तिरीयसंहिता०२.२.१.
8. मनुस्मृतिः.२०१.
9. तत्र.१२१२.
10. तत्र १२ १३.
11. तत्र१२१४.)
12. तत्र१२ १५.
13. तत्र१२२२.
14. तत्र१२२३.
15. तत्र१२२५-२४.
16. गीता १४ ५-
17. सांख्यकारिका१२ .
18. मनुस्मृतिः२९-१२.२६.
19. तत्र १२५४-५२ .

## सन्दर्भग्रन्थसूची


1. मनुस्मृतिः ,महर्षि मनुः, कुलुकभट्टः, मोलिलाल वनारसी दासः, दिल्ली, 1983।
2. सांख्यकारिका ,ईश्वरकृष्णः, चौखम्बासंस्कृतप्रतिष्ठानः,दिल्ली-7,1986 ।
3. भगवद्गीता ,एकादशटीकोपेता, नागप्रकाशनम्, दिल्ली, 1994।
4. धर्मशास्त्रेतिहासः ,डॉ. जयकृष्णमिश्रः, चौखम्बा संस्कृतसिरिज, वाराणसी, द्वितीय, 2010।
5. बौधायनधर्मसूत्रम् ,महर्षि बौधायनः, श्रीगोविन्दस्वामी, चौखम्बासंस्कृतसंस्थानः, वाराणसी।1989 ,
6. याज्ञवल्क्यस्मृतिः ,महर्षि याज्ञवल्क्यः, चौखम्बाकृष्णदास अकादमी, वाराणसी, 2014।